# *जगदम्बिकावैभव*महाकाव्ये द्वन्द्वविधानम्

**Kaumodaki: Journal of Multidisciplinary Studies**
[A Peer-Reviewed, Open Access Journal; Indexed in NepJoL]
ISSN: 2822 - 1567 (Print); ISSN: 2822 -1583 (Online)
Published by Research Management Cell, Vinduwasini Sanskrit Vidyapeeth (Campus)
Nepal Sanskrit University, Pokhara, Nepal
https://ejournal.vsc.edu.np

**प्रकाशपौडेलः**
Department of Sahitya (Sanskrit Literature), Vinduwasini Sanskrit Vidyapeeth (Campus), Pokhara, Nepal

***Article History:*** *Submitted 04 Sep. 2022; Reviewed 11 Oct. 2022; Accepted 06 Nov. 2022*
***Corresponding Author:*** *Prakash Paudel,* ***Email:*** *prakash.paudel@nsu.edu.np*
***DOI:*** *https://doi.org/10.3126/kdk.v3i1.52072*

**लेखसार**

*प्रस्तुतो लेखः नेपालस्य लुम्बिनीप्रदेशान्तर्गते गुल्मीमण्डले जातेन 'भीमकान्तपन्थी' इति नामकेन महाकविना विरचिते 'जगदम्बिकावैभवम्' महाकाव्ये द्वन्द्वविधानस्य गवेषणे केन्द्रितो वर्तते। वि. सं. २०४७तमे वर्षे विरचितं प्रथमवारं वि. सं. २०५५ तमे वर्षे प्रकाशितं पौराणिकीं कथां गृहीत्वा रचितं महाकाव्यमिदं तन्निरूपणे उल्लेखनीयं वर्तते। अत्र तस्यैव महाकाव्यस्य परिचयेन सह गवेषणीयविषयत्वेन जगदम्बिकावैभवकाव्ये द्वन्द्वविधानं कीदृशम् ? इति समस्यामुपस्थाप्य प्रस्तुते महाकाव्ये तदन्वेषणमुद्देश्यरूपेण स्थापितं विद्यते । तस्मिन्नेव क्रमे प्रस्तुते महाकाव्ये निरूपितमान्तरिकं बाह्यञ्च द्वन्द्वं विस्तरेण विवेचितं वर्तते। अध्ययनमिदं गुणात्मकं किल। अतोऽत्र पुस्तकालयीयया पद्धत्या सामग्रीणां सङ्कलनं विधाय निगमनात्मकेन विधिनाध्ययनं कृतं विद्यते । विषयस्य विश्लेषणे सैद्धान्तिकाधारतया पाश्चात्त्यो द्वन्द्वसिद्धान्तो गृहीतोऽस्ति । जगदम्बिकावैभवमहाकाव्ये प्रस्तुतं पात्रगतमान्तरिकं बाह्यमपि द्वन्द्वं समीक्ष्य तयोः काव्यस्य प्रधानफलसिद्धौ, रसाभिव्यक्तौ, कार्यावस्थायाः निर्वहणे, कथायां रोमाञ्चकतासिद्धये च साहाय्यं विस्तरेण प्रदर्शितं वर्तते । कथायां कौतुकवृद्धये रोमाञ्चकतासिद्धये च सफलेन द्वन्द्वेन युक्तं महाकाव्यमिदं द्वन्द्वविधानस्य दृष्ट्या विशिष्टं वर्तते इति निष्कर्षः स्थापितो विद्यते। जगदम्बिकावैभवे द्वन्द्वविधानसम्बद्धायाः जिज्ञासायाः समाधानाय प्रकृतमध्ययनं प्राधान्येन उपयोगि वर्तते तथैव च भविष्यति काव्यान्तरेषु एतत्प्रकारकान्वेषणाय एवमेव पक्षान्तरमाश्रित्य प्रकृतमहाकाव्यस्य समीक्षणाय च सहायकं भवितुं शक्नोति।*

**शब्दकुञ्जी :** आन्तरिकद्वन्द्वम्, काव्यफलम्, बाह्यद्वन्द्वम्, रसाभिव्यक्तिः, सङ्घर्षः

## विषयप्रवेशः

पौरस्त्यवाङ्मयस्य देवीभागवतादिषु पौराणिकग्रन्थेषु शक्तेः परिचर्चा कृता वर्तते। तथैव संस्कृतकाव्यपरम्परायां महामानवानां चरिताधारितानि काव्यानि बहूनि लभ्यन्ते । महामानवानां चरितं विषयीकृत्य काव्यकलनक्रमे लोकप्रसिद्धान् देवान् राज्ञश्च नायकान् विधाय प्रबन्धकाव्यानां लेखनं बहुभिर्बहुधा कृतमेव । अत एव रामस्य, कृष्णस्य, शिवस्य तथैवान्येषां च देवानां चरिताश्रितानि काव्यानि भारतीयासु लोकभाषासु संस्कृते च परश्शतानि लभ्यन्ते । भारतीयभाषासु यथा नायकस्य चरिताधारितानि काव्यानि लभ्यन्ते तथा नायिकायाश्चरिते आधारितानि

*Copyright 2023 © the Author(s) and the Publisher*
CC BY-NC

काव्यानि न प्राप्यन्ते। नेपालस्य लुम्बिनीप्रदेशान्तर्गते गुल्मीमण्डले वि.सं. १९७८ तमे वर्षे जातेन भीमकान्तपन्थीनाम्ना कविना रचितं *जगदम्बिकावैभवम्* इति महाकाव्यं जगज्जननीं देवीं नायिकामङ्गीकृत्य रचितं महाकाव्यं विद्यते । महाकविना भीमकान्तेन द्वे महाकाव्ये रचिते स्तः । तयोरेकं *जगदम्बिकावैभवम्* विद्यते चेत् तदपरं 'जगदीश्वरवैभवम्' अस्ति । रचनाकालदृष्ट्या प्रथमं वस्तुविस्तार-शिल्पपक्ष-कलात्मकादिपक्षाधारेण च उन्नतं *जगदम्बिकावैभव*महाकाव्यं २०४७ तमे वैक्रमसंवत्सरे विरचितं वैक्रमाब्दस्यैव २०५५ तमे वर्षे प्रकाशितं लभ्यते । महाकाव्येऽस्मिन् पाण्डित्यालङ्कारिकचमत्कृतिप्रदर्शने पृथग्यत्नं विनैव सहजतया सरल-सरस-सुबोध्यशैल्या काव्यवस्तूनि निबद्धानि सन्ति । द्वादशसङ्ख्यकेषु सर्गेषु विभक्तेऽस्मिन् काव्ये सदसतोः द्वन्द्वं शृङ्खलाबद्धतया प्रस्तूय पर्यन्ते सत्यस्य विजयं प्रदर्श्य **असतो मा सद्गमय** इति कान्तासम्मितसन्देशः प्रस्तुतो विद्यते । नायकस्य सुदर्शनस्य युधाजिता सह प्रवृत्तस्य द्वन्द्वस्य क्रमिकविकासेन महाकाव्यं सरोमाञ्चं सकौतुकं जातं विलोक्यते । अतः प्रस्तुतालेखः तत्र द्वन्द्वविधानसमीक्षणे केन्द्रितोऽस्ति ।

## समस्याकथनम्

*जगदम्बिकावैभव*महाकाव्ये द्वन्द्वं कीदृशम् ?

## उद्देश्यम्

*जगदम्बिकावैभव*महाकाव्ये द्वन्द्वस्यान्वेषणम् ।

## पूर्वकार्यविवरणम्

भीमकान्तपन्थीनाम्नः कवेः *जगदम्बिकावैभव*महाकाव्यस्य विविधपक्षमादाय व्याख्यानानि विवेचनानि च जातानि सन्ति । साहित्यिकवैशिष्ट्यदृष्ट्या विद्यावारिधिस्तरीयमनुसन्धानमपि कृतं लभ्यते । कतिपयैरन्वेषकैः महाकाव्ये निबद्धं द्वन्द्वं सङ्केतितं प्राप्यते किन्तु द्वन्द्वविधानसमीक्षणे केन्द्रितमनुसन्धानं न लभ्यते । महाकाव्यमिदं द्वन्द्वविधानदृष्ट्या उल्लेखनीयं विलोक्यते। दैवभावासुरभावयोः पुरातनकालाद् निरन्तरं प्रचलतः द्वन्द्वस्य प्रस्तुत्या दैवभावस्यानुसरणं मानवस्य हिताय भवतीति कान्तासम्मितोपदेशो महाकाव्ये प्रतिपादितः । तेन प्रकृताध्ययनस्योद्देश्यं *जगदम्बिकावैभव*महाकाव्ये द्वन्द्वविधानान्वेषणं विहितमस्ति । अतः *जगदम्बिकावैभव*महाकाव्यस्य विषये विहितानि पूर्वकार्याणि कालक्रमेणात्र प्रस्तूयन्ते -

टीकारामः पन्थी (२०५६) *जगदम्बिकावैभव*महाकाव्यस्य भूमिकाखण्डे '*जगदम्बिकावैभव*महाकाव्यस्य समीक्षणम्' इति शीर्षकस्यालेखे '(भ) काव्यात्मभूता द्वन्द्वात्मकता, लक्ष्यं च सत्यं शिवं सुन्दरम्' इत्युपशीर्षके *जगदम्बिकावैभव*महाकाव्यस्य द्वन्द्वविधानं समीक्षते । स महाकाव्यं द्वन्द्वात्मकघटनातः प्रारभ्य तथैव विकसितं भूत्वा चरमविन्दुं प्राप्य सत्यस्य, न्यायस्य, दैवभावस्य च विजयमसतः, अन्यायस्य, आसुरभावस्य च पराजयं प्रदर्श्य समापितोऽस्ति, इदं द्वन्द्वमेव काव्यस्य लक्ष्यम् इति कथयति ।

जगन्नाथ रेग्मी (२०७०) 'नेपाले संस्कृतमहाकाव्यप्रणयनपरम्परा' इति लेखे नैपालकमहाकाव्यकाराणां काव्यानाञ्च परिचायनक्रमे *जगदम्बिकावैभव*महाकाव्यस्य कथावस्तुकाव्यकलावैशिष्ट्यादीनां चर्चां करोति। '*जगदम्बिकावैभवस्य* विषयवस्तु देवीभागवतपुराणात् गृहीतमस्ति । विषयदृष्ट्या परम्परितं काव्यकलादृष्ट्या नवीनं महाकाव्यं वर्तते । अत्र जगदम्बिकां नायिकां विधाय नवप्रयोगः विहितोऽस्ति । शिल्पपक्षे नवप्रयोगः, भावपक्षस्य प्राधान्यम्, प्रासादगुणाधिक्यम्, सरसानां सुमधुराणाञ्च पदावलीनां प्रयोगश्चेति महाकाव्यस्य विशेषताः सन्ति' (रेग्मी, २०७० : पृ.३६) । इति कथयति । अत्र *जगदम्बिकावैभव*महाकाव्यगतस्य द्वन्द्वविधानस्य समीक्षणं लेखकीयमुद्देश्यं न दृश्यते । तस्मादेव

हेतोरत्र द्वन्द्वविधानं विवेचितमपि न विद्यते ।

जगन्नाथ रेग्मी (२०७३) 'काव्यतत्त्वदृष्ट्या *जगदम्बिकावैभव*महाकाव्यस्य पर्यालोचनम्' इति लेखे विषयवस्तुचरित्रच्छन्दोऽलङ्कारगुणरीतिरसभावादीनामाधारे *जगदम्बिकावैभव*महाकाव्यस्य मूल्याङ्कनं कुर्वन् महाकाव्यस्य सबलान् दुर्बलानपि पक्षान् निर्दिशति । स विषयवस्तुरसभावादिकाव्यात्मकगुणगौरवेण सहृदयहृदयाकर्षकं जगदम्बिकावैभवं वर्णनीयाङ्गविषयवर्णने, समाजचित्रणे शास्त्रव्युत्पत्तिप्रदर्शने च शैथिल्ययुतमस्तीति निष्कर्षयति । अत्र द्वन्द्वविधानविवेचनस्योद्देश्यं नास्ति अत विवेचितञ्च नास्ति ।

महानन्द तिमिल्सिना (२०७३) '*जगदम्बिकावैभव*महाकाव्यस्य साहित्यिकमनुशीलनम्' इति शीर्षकयुते विद्यावारिधिस्तरीये शोधप्रबन्धे द्वन्द्वविधानस्य चर्चां कुर्वन् "*जगदम्बिकावैभव*महाकाव्ये स्पष्टमान्तरिकबाह्यद्वन्द्वं दृश्यते, महाकाव्यं भावकेभ्यो जिज्ञासामुत्पादने समर्थमस्ति, महाकाव्ये सत्यासत्ययोः, प्रबलनिर्बलयोः, न्यायान्याययोः, देवासुरयोः, आध्यात्मिकभौतिकपक्षयोः, आस्तिकनास्तिकयोर्मध्ये द्वन्द्वमस्ति" इति समुल्लिखति ।

तथैव 'जगदम्बिकावैभवे शास्त्रव्युत्पत्तिः' (२०७७) इति '*जगदम्बिकावैभव*महाकाव्ये स्तुतिप्रीतिसूक्तिप्रकृतिसौन्दर्यसमीक्षणम्' (२०७७) इति च शीर्षकयुते लेखे *जगदम्बिकावैभव*महाकाव्यस्य वेदवेदाङ्गदर्शनपुराणेतिहाससङ्गीतादिशास्त्रगता व्युत्पत्तिः, विविधस्तुतिप्रीतिसूक्तिप्रकृतिसौन्दर्यं च प्रदर्शितमस्ति । तासु रचनासु द्वन्द्वविधानसमीक्षणोद्देश्यं नास्ति । अत समीक्षितञ्च नास्ति ।

नुरापतिः पोखरेलः (२०७७) 'नैपालका महाकाव्यकाराः' इत्यत्र नेपालदेशीयानां महाकाव्यकाराणां चर्चां करोति । तस्मिन्नेवोपक्रमे भीमकान्तपन्थीरचितयोः *जगदम्बिकावैभव*जगदीश्वरवैभवमहाकाव्ययोः विषये समुल्लिखति। तस्मिन्नेव क्रमे स महाकाव्यस्य कथावस्तु-शैली-विस्तारादिविषये सङ्क्षेपेण विवेचनां करोति। द्वन्द्वविधानस्य विषये किमपि नोल्लिखति । तत्र तदुद्देश्यमपि न दृश्यते ।

प्रेमप्रसाद चौलागाईं (२०७७) 'नैपालकसंस्कृतमहाकाव्यपरम्परायां *जगदम्बिकावैभवम्*' (नेपालमा संस्कृत-महाकाव्य परम्परामा *जगदम्बिकावैभवम्*) इति शीर्षकस्यालेखे "जगदम्बिकावैभवे सदसतोः द्वन्द्वशृङ्खला अनुक्रमेण प्रस्तुताऽस्ति, पर्यन्ते सत्यस्य जयं प्रदर्श्य सर्वे सर्वत्र सत्यमनुसरणीयमिति सन्देशः प्रदत्तोस्ति" इति कथयति ।

लक्ष्मीकान्त पन्थी (२०७७) '*जगदम्बिकावैभव*महाकाव्यस्य कथावस्तुविवेचनम्' इति शीर्षकयुते लेखे महाकाव्यस्य कथां प्रस्तूय शीर्षकसार्थकतां प्रदर्शयति । तथा च अलङ्कृता, प्रायोऽसमस्ता, सरसा, सरला च भाषा प्रयुक्ता विद्यते इति समुल्लिखति । अत्र स द्वन्द्वविधानविषये न किमप्युल्लिखति ।

*जगदम्बिकावैभव*महाकाव्यस्य रसालङ्कारवस्तुरीत्यादिविधानान्वेषणमुद्देश्यं विधाय विहितेषु कतिपयान्वेषणेषु द्वन्द्वविधानविषये सङ्केतितं लभ्यते । तत्र महाकाव्ये द्वन्द्वविधानं कीदृशम् ? महाकाव्योत्कर्षे द्वन्द्वस्य भूमिका कीयती अस्तीति विस्तरेण विवेचितं न लभ्यते ।

## अध्ययनविधिः

प्रकृतमध्ययनं गुणात्मकमस्ति । अतः प्रस्तुताध्ययने पुस्तकालयस्योपयोगं कृत्वा सामग्र्यः सङ्कलिताः सन्ति । अध्ययने प्रयुक्तासु सामग्रीषु *जगदम्बिकावैभव*महाकाव्यं प्राथमिकस्रोतसः सामग्री वर्तते । विषयसम्बद्धाः साहित्यशास्त्रीयग्रन्थाः समालोचनालेखादयः द्वितीयस्रोतांसि सन्ति ।

प्रधानविषयस्य निगमनात्मकविधिनाध्ययनं विहितमस्ति चेत् सन्दर्भविषयाः प्रयुक्तसामग्र्यश्च लेखकदिनाङ्कपद्धत्या (APA Style) व्यवस्थापिताः सन्ति ।

## द्वन्द्वपरिचयः

परस्परविरुद्धयो विचारयो व्यवहारयोर्वा सङ्घर्षः द्वन्द्वमिति भण्यते । काव्येषु विविधजीवनपरिवेशः, परम्परिता मान्यता, प्रेम-दया-करुणा-घृणा-हिंसा-परोपकारादयश्च द्वन्द्वस्य माध्यमेनैव प्रकाशिताः भवन्ति (न्यौपाने, २०२१, पृ.३५५) । पाश्चात्त्यकाव्यचिन्तकैः काव्ये तस्य स्थितिः परिकल्पिता वर्तते । समाजे नवीनपुरातनचिन्तनयोः, भिन्नभिन्नलक्ष्योद्देश्यजीवनादर्शयुक्तयोः समुदाययोः, विपरीतधर्मयोः, भिन्नमान्यतयोः, पार्थक्ययुक्तयोः जीवनदर्शनयोश्च विरोधः दृश्यते । परस्परं विपरीतगतियुक्तयोः शक्त्योः सङ्घर्षः द्वन्द्वे रूपान्तरितो भवति ।

समाजस्य, विचारस्य, चिन्तनस्य, व्यवहारस्य च पार्थक्याद् समुत्पन्नः द्वन्द्वः द्विप्रकारको भवति । तद्यथा- आन्तरिको बाह्यश्च । भौतिकयुद्धम्, वाक्युद्धम्, विवादादयः बाह्यद्वन्द्वे गण्यन्ते चेत् जनमनसि जायमानास्तर्कवितर्कादयः आन्तरिकद्वन्द्वे आगच्छन्ति । काव्यस्य पात्रमात्मनि सङ्घर्षं कुरुते, निर्णयावसरे मनोदौर्बल्यनिराकरणावसरे वा तस्य मनसि ये परस्परविरुद्धविचाराः तर्कवितर्काः मनस्तापादयः विचरन्ति ते आन्तरिकस्य द्वन्द्वस्य परिणामाः । मनुष्यस्य प्रकृत्या, मानवेन, समाजेन, प्रविधिना, भाग्येन, भगवता च सह यदि विरोधश्चेत् स बाह्यद्वन्द्वः । गद्यकाव्येषु नाटकेषु च बाह्यद्वन्द्वेन सहाभ्यन्तरद्वन्द्वञ्च प्रयुज्यते । पद्यकाव्ये तु आन्तरिकद्वन्द्वस्योपस्थितिः प्रबला भवति । पाश्चात्यसमीक्षकानां मते काव्ये द्वन्द्वस्य सफलनिर्वाहेण काव्यं रमणीयं सकौतुकञ्च निष्पद्यते ।

## महाकाव्यस्य वस्तु, द्वन्द्वविधानस्य तात्पर्यञ्च

*जगदम्बिकावैभव*महाकाव्यस्य वस्तु देवीभागवतात् गृहीतमस्ति । अस्यां कथायां मार्कण्डेयपुराणम्, ब्रह्मवैवर्तीयप्रकृतिखण्डः, शिवमहापुराणम्, उमासंहिता चेत्यादिषु ग्रन्थेषु वर्णितस्य शक्तिस्वरूपिण्या भगवत्याः जगदम्बायाः चरितस्य च प्रभावो दृश्यते । सुदर्शनस्य राज्यप्राप्तियत्ने युधाजिता निषिद्धे तयोः स्पर्धया महाकाव्यस्य वस्तु द्वन्द्वात्मकतया विकसितं दृश्यते । जगदम्बिकया युधाजितः संहारानन्तरं द्वन्द्वं समाप्यते । तेन सह महाकाव्यस्य कथावस्तु च समाप्यते । अत्र प्राचीनकाले अयोध्यानिवासिनः सुदर्शनस्य शत्रुणा बलादपहृतराज्यस्य पुनः सम्प्राप्तेः कथा वर्णिता विद्यते । महाकाव्यस्य कथा एतादृशी अस्ति : पुरा ध्रुवसन्धिनाम्नः राज्ञः ज्येष्ठायां भार्यायां मनोरमायां 'सुदर्शनः', कनिष्ठायां लीलावत्यां 'शत्रुजित्' चेति सुतौ जातौ । राज्ञः ध्रुवसन्धेः कनिष्ठायाः लीलावत्याः सुते शत्रुजिति स्नेहाधिक्यमविद्यत । यदा तौ राजकुमारौ विविधबालसुलभक्रीडारतौ दिने दिने वृद्धिङ्गतौ पञ्चवर्षीयौ जातौ तदा एकदा मृगयार्थं वनं सम्प्राप्तो राजा ध्रुवसन्धिः सिंहेन हतः । ततो मृत्युसंस्कारादीनि तस्योर्ध्वदैहिकानि कर्माणि अक्रियन्त । राज्ञः परलोकगमनानन्तरं राज्यभारं वोढुं सचिवाः मन्त्रिणश्च परम्परामनुसरन्तो राज्ञः ज्येष्ठं सुतं सुदर्शनं राजपदे नियोजयितुमयतन्त । तत्र ससेनः प्राप्तो युधाजित् सुदर्शनस्य मातामहं वीरसेनं हत्वा राजपदे दौहित्रं शत्रुजितं नियुक्तवान् । पितुः वीरसेनस्य मृत्योः समाचारं श्रुत्वा मनोरमा स्वं पुत्रं सुदर्शनञ्च मृत्युसङ्कटापन्नं मत्वा सद्य एव स्वकीयहितचिन्तकेन मन्त्रिणा सह मन्त्रयति । अचिरेण सा गुप्तरूपेण स्वपुत्रेण सुदर्शनेन मन्त्रिणा च साकं भारद्वाजमुनेराश्रमं प्राप्नोति । गुप्तचरेण सम्प्रेषितात् सन्देशात् गुप्तनिवासिनः सुदर्शनस्य निवासस्थानं ज्ञातवान् युधाजित्तं व्यापादयितुं भारद्वाजाश्रमं गच्छति । स समातरं तं ततोऽयोध्यां नेतुमिच्छति परन्तु मुनेः शापभयात् प्रत्यागच्छति । सुदर्शनो मुनिबालकात् विन्दुरहितं देव्याः बीजमन्त्रं श्रृणोति । रहस्यज्ञानं विना कौतुकाधीनः स तं जपति । राजपुत्रस्य निष्कामभक्त्या प्रभाविता जगदम्बिका तस्मै राज्यं प्राप्स्यसीति वरं ददाति । तथैव सुदर्शनस्योदयं कामयमाना जगदम्बिका स्वप्नजालाधीनां काशीराजपुत्रीं शशिकलां च सुदर्शनेन सह परिणेतुं प्रेरयति । राजा सुबाहुः शशिकलायाः विवाहार्थं स्वयंवरसमारोहं समायोजयति । मात्रा मनोरमया मा गच्छ मा गच्छ इति निवारितोऽपि सुदर्शनः स्वयंवरे सहभागितायै काशीं प्राप्नोति । शत्रुजितं नीत्वा स्वयंवरे

सम्प्राप्तो युधाजित् सुदर्शनं दृष्ट्वा तस्मै क्रुध्यति । केरलराजः तं शान्तयति । स्वयंवरे समागतानां राज्ञां बलापेक्षया कन्यायाः स्पृहायाः स्थानं भवतीति च स्मारयति । परन्तु यदि कन्या सुदर्शनं वृणोति चेत् तं हत्वा इमां शत्रुजिते ददामीति उज्जयिन्या राजा युधाजित् हठं करोति । पितृभ्यां वारं वारं स्मारितापि शकुन्तला सुदर्शनं विहायान्यं वृणीतुं नेच्छति । सुबाहुः स्वयंवराय च विमनष्कायाः तस्याः परिणयः गुप्तरूपेण गृहान्तरे एव सम्पादयति । पत्नीं शशिकलां नीत्वा काशीराजस्य राजप्रासादान्निर्गतेन सुदर्शनेन जामातृरक्षायै समागतेन सुबाहुना च सह शत्रुजितः युधाजितश्च युद्धं भवति । जगदम्बिका तत्रावतीर्य युधाजितं शत्रुजितं च व्यापादयति । सुबाहुसुदर्शनाभ्यां वरं च ददाति । ततोऽयोध्यां प्राप्तः सुदर्शनः सुखेन राज्यं सञ्चालयति । इत्येवं वस्तुवर्णनं महाकाव्ये विहितमस्ति । अत्र वस्तुविन्यासक्रमे वीरसेनयुधाजितोः, युधाजित्सुबाहोः, शत्रुजित्सुदर्शनयोर्मध्ये बाह्यद्वन्द्वम्, मनोरमायाः, शशिकलायाः, युधाजितः, सुबाहोश्चान्तरिकद्वन्द्वञ्च कथं विन्यस्तमस्ति ? तस्य कथायां रोमाञ्चकतासिद्धये कौतूहलवृद्धये च भूमिका कीदृशी ? इति विवेचनमेवात्र द्वन्द्वविधानान्वेषणस्य प्रधानोद्देश्यमस्ति ।

## *जगदम्बिकावैभव*महाव्ये द्वन्द्वम्

महाकवेर्भीमकान्तस्य *जगदम्बिकावैभव*महाकाव्यं द्वन्द्वप्रयोगदृष्ट्या उल्लेखनीयं महाकाव्यमस्ति । तत्र विशेषतः सदसदोः, न्यायान्याययोः, देवभावासुरभावयोश्च द्वन्द्वं प्राधान्येन निरूपितमस्ति । महाकाव्यस्य प्रथमसर्गे एव ध्रुवसन्धिराज्ञः परलोकगमनानन्तरं युधाजित् परम्परया प्राप्तं सुदर्शनस्य राज्यं बलादपहृत्य स्वकीयदौहित्राय शत्रुजिते दातुमिच्छति । एतस्मादेव महाकाव्ये द्वन्द्वस्य बीजाधानं भवति । तदेव द्वन्द्वबीजं विकसितं विस्तृतञ्च भूत्वा महाकाव्यस्य वस्तुविस्तारे रसनिबन्धने च महत्त्वपूर्णं स्थानमाधत्ते । महाकाव्ये बाह्यद्वन्द्वस्य प्रयोगाधिक्यं वर्तते चेदाभ्यन्तरद्वन्द्वस्य च समुपस्थितिर्विद्यते । आन्तरिकद्वन्द्वं राज्ञः युधाजितः, शशिकलायाः, काशीराजस्य सुबाहोः, मनोरमायाश्च सन्देहस्थलेषु लभ्यते चेत् बाह्यद्वन्द्वं शत्रुजित्युधाजिद्भ्यां वीरसेनभारद्वाजसुबाहुकेरलाधिपसुदर्शनानां युद्धे वाक्कलहे च प्रकटितमस्ति ।

### आभ्यन्तरद्वन्द्वम्

काव्यगतचरित्रस्य आत्मनोऽत्मना एव सङ्घर्षः द्वन्द्वं वा आन्तरिकद्वन्द्वम् । स्वसामर्थ्ये अल्पतायाः, परिस्थितेर्वा कारणात् आन्तरिकद्वन्द्वग्रस्तो जनः तर्कवितर्के भ्रमति । प्रकृतमहाकाव्येऽपि स्थाने स्थाने आन्तरिकद्वन्द्वस्य मनोहारिणी योजना भीमकान्तमहाकविना विहिता विद्यते । आन्तरिद्वन्द्वस्य कथायां कौतुकवृद्धये रोमाञ्चकतासिद्धये च विशिष्टा भूमिका दृश्यते । अत्र महाकाव्यगतमान्तरिकद्वन्द्वं विविधेषु शीर्षकोपशीर्षकेषु विवेचितमस्ति ।

#### मनोरमाश्रितमान्तरिकद्वन्द्वम्

पितुर्वीरसेनस्य वधानन्तरं राज्ञ्या मनोरमायाः मनसि युधाजित् मम सुतं मां च किं घातयति? मया किं करणीयम् ? एतस्यामवस्थायां मम मार्गे सहायः कः ? (*जगदम्बिकावैभव*म्, १/१४ श्लो.) इति विचाराः उत्पद्यन्ते । एतैर्विचारै मनोरमायाः आभ्यन्तरद्वन्द्वस्य प्रबला स्थितिर्विलोक्यते । काशीराजभारद्वाजयोर्मध्ये कस्य शरणे गमनमुचितमिति वितर्के च आन्तरिकद्वन्द्वं मनोरमायाः मनसि समुद्भूतम् । अनन्तरं सा स्वतनयं सुदर्शनं नीत्वा भारद्वाजमुनेराश्रमं गच्छति । तत्र सुदर्शनं व्यापादयितुं युधाजित् आगच्छन्नस्तीति श्रुत्वा जातभयाकुलावस्था काव्यस्यान्तरिकं द्वन्द्वं सूचयति (तिमिल्सिना, २०७३, पृ. १२९) । मुनीनां मुखात् जगदम्बिकायाः प्रसादात् तव सुतः राजा भविष्यतीति श्रुत्वा भारद्वाजाश्रये निवसन्त्या मनोरमायाः मनसि वितर्को जायते -

सैन्यं बलं मम सुतस्य सहायकोऽपि
कोषः प्रजाः प्रकृतयश्च सुहृन्न कोऽपि
केनाप्तुमर्हति स राज्यमसाधनोऽपि
युष्मत्कृपाबलमवाप्य भवेन्नृपोऽपि ॥ (*जगदम्बिकावैभवम्*, ५/१३ श्लो.)

सैन्य-कोष-सहाय-प्रजा-मित्रैर्विहीनः मत्पुत्रः बलवन्तं वैरिणं कथं जेष्यति ? कथं वा तस्मै राज्यादिसुखलाभः ? किं साधनं विना साध्यसम्भवः ? किमुत मुनीनां दयाबलेन सर्वं सिद्ध्येत ? इत्यादयः तर्कवितर्काः मनोरमायाः मनसि दृश्यन्ते । अतोऽत्र परस्परविरुद्धविचाराणां सञ्चारः तस्यामाभ्यान्तरद्वन्द्वोत्कर्षं सृजति ।

महाकाव्ये मनोरमायाः आन्तरिकद्वन्द्वस्य प्रस्तुतौ अपेक्षितविस्तारो न लभ्यते । पितुः वीरसेनस्य मृत्योरनन्तरम्, सुदर्शनं हन्तुकामो युधाजित् भारद्वाजाश्रमं प्रत्यागच्छतीति सन्देशं श्रुत्वा, भारद्वाजाश्रमे पुत्रस्य राज्यस्य चर्चायां च आन्तरिकद्वन्द्वस्य प्रभावोत्पादकेन वर्णनेन वस्तुवर्णने यावत् रोमाञ्चाधानं कर्तुं शक्यते स्म, तावदत्र न लभ्यते। वस्तुनः प्रवाहः पर्वतस्य निम्नभूमौ नदप्रवाह इव रैखिकभङ्ग्या तीव्ररूपेणाग्रेऽग्रे चलति। कथाप्रवाहे क्वचित् क्वचित् वामदक्षिणभागे किञ्चित् विस्तारः, समस्थलेषु इव गतौ मन्दता, कूपादिषु इव किञ्चित् विरामो वा अपेक्ष्यते। अत्र तादृशेषु स्थलेषु यथोचितं वस्तुनः विस्तारः, गाम्भीर्यं वा न लभ्यते।

### युधाजिताश्रितमान्तरिकद्वन्द्वम्

भरद्वाजाश्रमे ससुता मनोरमा निवसन्ती अस्तीति सन्देशहरस्य वचनमाकर्ण्य ससेनो युधाजित् तत्र प्राप्नोति । स भरद्वाजमुनिं सुदर्शनमयोध्यायां नयामीति कथयति । युधाजित् तौ घातयतीति मत्वा मुनिस्तं निराकरोति। भरद्वाजाद् भीतः युधाजित् वैरं विधेयं न वेति चिन्तयति -

अथो युधाजिन्नृपतिः स्वमन्त्रिणं जगाद मन्त्रिन् ! करणीयमस्ति किम् ।
बलान्नयाम्येव समातरं रिपुं सुदर्शनं किं ? वद सर्वसम्मतम् ॥
उदर्कभूतिं प्रतिवाञ्छता सता न चाप्युपेक्ष्यो रिपुरल्पकोऽपि वा ।
यदि प्रवृद्धः खलु मृत्यवे भवेत् स राजयक्ष्मेव चिकित्सितोऽपि च ॥ (पूर्ववत्, ४/१-२ श्लो.)

दौहित्रशत्रुनिग्रहेच्छायाः भरद्वाजभीतेः च कारणात् स किमपि निर्णेतुं न शक्नोति। तदा युधाजितः मनसि भरद्वाजस्य वचनं पालयित्वा प्रत्यागच्छानि अथवा तद्वचनमुल्लङ्घ्य सुदर्शनं नीत्वा हनानीति विरुद्धविचरयोः कारणादान्तरिकद्वन्द्वं प्रबलं दृश्यते ।

अस्मिन् प्रसङ्गे युधाजितः मानसद्वन्द्वस्य वर्णनं यथा हृदयाकर्षकतया विस्तीर्य कर्तुमवसरः आसीत्, कविना तथा न कृतमिति आभासते ।

### शशिकलाश्रितमान्तरिकद्वन्द्वम्

नायिका शशिकला नायकं सुदर्शनं कामयते। तस्याः मनसि एकत्र सुदर्शनेन सम्मिलनेच्छा बलवती विद्यते अपरत्र तु मां पितरौ न दास्यतः इति च कल्पयति। परिणेयाः राजानः राजकुमाराश्च बहवो सन्ति, मनस्तत्र न गच्छति, तत्तु राज्यच्युते बल-द्रव्य-सहाय-मित्रादिहीने मुनिशरण्ये सुदर्शने परिधावति, इति विचारवैभिन्याद् सा आन्तरिकद्वन्द्वे पतिता दृश्यते। एतेन शशिकलायामानसद्वन्द्वेन महाकाव्यास्वादकाः सकौतुकाः, सरोमाञ्चाश्च जायन्ते। ते महाकाव्यसमाप्तिं यावत् इतो किं भविष्यतीति कौतुकाधीनाः भवन्ति । तथा सत्यपि महाकाव्ये वस्तुनः यथोचितविस्ताराभावेन शशिकलायाः मानसद्वन्द्वस्य चमत्कृतिमयः विन्यासः यथा कर्तुं शक्यते स्म तथा कृतं नावलोक्यते ।

**सुबाहुराजन्याश्रितमान्तरिकद्वन्द्वम्**

वारं वारं विनीताऽपि पुत्री शशिकला सुदर्शनं विहायान्यं राजपुत्रं वृणीतुं नेच्छति । नीतिज्ञानरहितां स्वसुतां दृष्ट्वा सुबाहुः स्वयंवरसमारोहाय स्वयमेव समाहूतानां राजकुमाराणां समूहे किं व्याहरामीति चिन्ताकुलो दृश्यते । तदा तस्य चित्तमन्तर्द्वन्द्वपूर्णं दृश्यते ।

स्वयंवरसमारोहे समागताः राजानः स्वयंवरसमारोहो न भविष्यतीति श्रुत्वा किं कुर्वन्ति ? तेषामग्रे कथं समाचारोऽयं पूरयामि इत्यादिकं स्मृत्वा सुबाहुः चिन्तयति -

सङ्गता हि सकलाः क्षितिपाला ये स्वयंवरमखेऽर्पितपत्राः ।
स्वस्वमञ्च उपविश्य यतन्ते कन्यका क्व नु कदा बहिरेति ॥
सर्व एव बलिनश्च ससैन्या नैकलं नृपमलं प्रतिकर्तुम् ।
किन्तु तान् बलवतो मिलिताँस्तु वार्तयापि परिषोढुमशक्यम् ॥ (पूर्ववत्, ८/३१-३२ श्लो.)

राजा सुबाहुः स्वयंवरोत्कुण्ठितराजभयेन शशिकलायाः हठेन च मनस्तापमनुभवति । स पुत्रीं कस्मैचित् कुमाराय बलादर्पयितुं तथा च स्वयंवरायोजनं विनैव निमन्त्रितान् राज्ञः प्रत्यावर्तयितुमपि न शक्नोति । स कदाचित् राजसमूहे प्रार्थनाय प्राप्नोति, तत्र हताशः स तत्क्षणमेव सुतां विनेतुं यतते, सुता तस्य वचनं न मन्यते । ततः स राजसमूहे स्वयंवरं विनैव स्वराजधानीं प्रस्थितेभ्यः सर्वेभ्यः धनधान्यादिकं यच्छामि (पूर्ववत्, ८/३७ श्लो.) इति च कथयति । कदाचित् पणबन्धं कारयामीति चिन्तयति (पूर्ववत्, ८/४० श्लो.) । एतेन मानसद्वन्द्वेन काव्यस्य पठनकाले श्रवणकाले च भावकानां मनसि इतः किं भविष्यति पुनः किं भविष्यतीति जिज्ञासा समुदेति । एवं प्रकारेण चिन्तया व्याकुलस्य राज्ञः सुबाहोः मानसिकेन द्वन्द्वेन महाकाव्यस्य कथा सरोमाञ्चा सकौतुका विद्यते । परन्तु कतिपयस्थलेषु सुबाहोः मनसः चित्रणं विस्तरेण कृत्वा मानसद्वन्द्वस्य चमत्कृतिमयं प्रयोगं यथा कर्तुमवसरः आसीत् तथा कृतमत्र नोपलभ्यते ।

**बाह्यद्वन्द्वम्**

*जगदम्बिकावैभव*महाकाव्यं बाह्यद्वन्द्वप्रयोगदृष्ट्या च उल्लेखनीयमस्ति । सत्यासत्ययोः न्यायान्याययोः दैवभावासुरभावयोश्च द्वन्द्वं तत्र दृश्यते । भगवती जगदम्बिका दैवभावनायाः पक्षं पोषयति चेत् आसुरभावस्य पक्षे युधाजिच्छत्रुजितौ स्तः । जगदम्बिकायाः सत्यमार्गे महाकाव्यस्य नायकः सुदर्शनः, नायिका शशिकला, राजा सुबाहुः, सुदर्शनस्य माता मनोरमा च प्रचलन्तः सन्ति ।

ध्रुवसन्धेः मृत्योरनन्तरं गुरुर्वशिष्ठः सचिवाश्च राज्ञः जेष्ठसुतं सुदर्शनं राजपदे स्थपयितुं कामयन्ते -

अनन्तरं राज्यपदे नियोक्तुं सुदर्शनं ज्येष्ठवयस्कमेव ।
गुरुर्वसिष्ठः सचिवाः प्रजाश्च परस्परं मन्त्रममन्त्रयन्त ॥ (पूर्ववत्, १/६३ श्लो.)

स्वदौहित्रस्य विमातुः सुतः राजपदे नियोज्यते इति समाचारं श्रुत्वा ससेनः युधाजिदागच्छति । स स्वदौहित्रं शत्रुजितं राजपदे नियोजनाय यतते-

गुणेन शीलेन च विद्ययापि ज्यायान् यथा मे तनयातनूजः ।
सुदर्शनो नैव तथा ततस्तं राज्ये समारोप्य धनं ग्रहीतुम् ॥
वाञ्छन्ति दुर्मन्त्रिगणा भवन्तस्तथा विधातुं प्रविचारयन्तु ।
ससैनिके तिष्ठति मय्यधृष्ये नान्ये कनिष्ठं नृपतिं प्रकुर्युः ॥ (पूर्ववत्, १/७३-७४ श्लो.)

स्वदौहित्रं सुदर्शनं राजपदे स्थापयितुं तत्र समागतो वीरसेनोऽपि तं निराकुर्वन् सुदर्शनाय राजपदाभिषेकः न्याय्य इति कथयति । तयोर्वाक्द्वन्द्वं युद्धे परिणतं भवति । युधाजिद्वीरसेनयोर्द्वन्द्वेन महाकाव्यं रोमाञ्चकं सकौतुकञ्च

जातमस्ति । एतत् मानवयोः द्वन्द्वं विद्यते ।

महाकाव्ये शत्रोः भीतायाः मनोरमाया अनुरोधात् भारद्वाजमुनिः तयो रक्षार्थं युधाजितं प्रत्यावर्तनाय निर्दिशति । युधाजिदपि समातरं सुदर्शनं नीत्वा एव प्रत्यागच्छामीति वदति । स्वकीयाश्रमाद् बलादपहृत्य सुदर्शनं नेतुं वाञ्छतस्तस्य भारद्वाजमुनिना सह द्वन्द्वं दृश्यते । प्रकरीरूपे प्रासङ्गिकेतिवृत्ते जयद्रथेन सह भीमसेनस्य, बलिराजेन सह विष्णोः, विश्वामित्रेण सह वशिष्ठस्य, कार्तवीर्येण सह परशुरामस्य च विवादः समुद्धृतोऽस्ति । एतेन प्रासङ्गिकेन वस्तुना च महाकाव्यं द्वन्द्वात्मकं जातं वर्तते ।

शशिकलायाः स्वयंवरप्रसङ्गे च सुबाहुशशिकलयोः सङ्घर्षः दृश्यते । पिता सुबाहुः बलधनराज्यश्रीसम्पन्नं शत्रुजितं तदन्यं राजकुमारं वा वृणीष्व, बालमतः पराक्रमरहितम्, मृत्युसन्निकटप्राप्तम्, सैन्यधनसहायरहितम्, मुनेराश्रये स्थित्वा वन्यफलादिकैर्जीवनधारकं सुदर्शनं जहीति कथयति । शशिकला तन्न स्वीकरोति । अत्र मातापितरौ कन्यायाः कृते कुलं धनञ्च इच्छन्ति । कन्या शशिकला तु प्रेम्णः ऋते न किमपि पश्यति । सुदर्शनरतौ निमग्ना शशिकला प्रेमान्धा जाता अस्ति । सा स्वहार्दं विहाय धनं बलं सहायं राज्यं चेत्यादिकं किञ्चिन्न गणयति । मतापितरौ तस्याः प्रेमं भावुकप्रेमरूपेण पश्यतः । तेनैव राजा सुबाहुः सुदर्शनेन सह परिणयेच्छां श्रुत्वा हसति (पूर्ववत्, ५/२९ श्लो.) । प्रियं पतिरूपेणाप्तुं शशिकलया कृते सङ्घर्षे धनमनसो द्वन्द्वं विद्यते । समकालिकौ पितराविव तौ स्वरुचिभिन्नं युवत्याः वरणं निवर्तयितुं यतेते । अभिभावकेच्छां कुलमर्यादामपि न विगणय्य काममाचरन्त्या शशिकलया सह सुबाहुराज्ञः द्वन्द्वं नूतनविचार-रूढचिन्तनयोः, कुलसमाजमर्यादावलम्बन-स्वच्छन्दाचारयोः, प्रेम्णः प्राप्तित्यागयोश्च सङ्घर्षः विद्यते । तस्मिन् द्वन्द्वे मनस्विन्याः शशिकलायाः विजयं प्रदर्श्य कविः समाजे नवमान्यतायाः स्वार्थहीनप्रेम्णः सर्वस्वीकार्यताञ्च दर्शयति ।

स्वयंवरप्रसङ्गे एव युधाजिता केरलाधिपतेर्विचारद्वन्द्वं निदर्शनमेव विद्यते । कन्याहरणोद्यतं युधाजितं शान्त्वयन् केरलाधिपः कथयति -

राजन् ! युद्धं न कर्तव्यमस्मिनिच्छास्वयंवरे ।<br>
स्वयंवरस्तु कन्यायाः इच्छयैव बलान्नहि ॥<br>
पूर्वं त्वयाप्यसौ राज्याद् विनिष्कास्य प्रवासितः ।<br>
युद्धे मातामहोऽप्यस्य ह्यन्यायेनैव मारितः ॥<br>
राज्यमस्य स्वदौहित्रे बलेन भवता हृतम् ।<br>
कोऽस्यापराधो येनेत्थं हनिष्यसि निरागसम् ॥ (पूर्ववत्, ६/४०-४२ श्लो.)

केरलाधिपस्य वचनं श्रुत्वा युधाजित् भृशं कुप्यति । स सद्यैव प्रतिज्ञां करोति- कन्या यदि सुदर्शनं वृणीयात्तदा तमवश्यमेव हनामीति ( पूर्ववत्, ७/४ श्लो.) । एतेन महाकाव्यस्य प्रारम्भतः विकसितं युधाजित्सुदर्शनयोः द्वन्द्वं चरमावस्थानिकटं प्राप्नोति ।

सुदर्शनः नवोढां पत्नीं शशिकलां श्वसुरराजप्रासादात् स्वनिवासं प्रति नेतुमिच्छति । मार्गे युधाजिच्छत्रुजितौ कन्यापहरणाय सन्नद्धौ तिष्ठतः । सुबाहुरपि पुत्रीं जामातारं रक्षयितुं यतते । शत्रुजित्सुदर्शनयोः सुवाहुयुधाजितोः भयङ्करं युद्धं भवति । तदा एव भक्तवत्सला जगदम्बिका तत्रावतीर्य सुदर्शनस्य साहाय्यं करोति । क्रोधातिशयितौ युधाजिच्छत्रुजितौ जगदम्बिकया सह योद्धुं प्रारभेते । महाकाव्यस्य प्रारम्भतः क्रमेण विकसितं द्वन्द्वं चरमावस्थायां प्राप्नोति । भीषणे युद्धे द्वयोरेव मृत्युर्भवति । सदसदोः, धर्माधर्मयोः, न्यायान्याययोः दैवभावासुरभावयोश्च द्वन्द्वे सतः, धर्मस्य, न्यायस्य, दैवभावस्य च जयं तथा च जगदम्बिकाभक्तेः महत्त्वं प्रदर्श्य महाकाव्यं समाप्यते । महाकाव्ये युधाजित्सुदर्शनयोः द्वन्द्वे पूर्वं युधाजितः पापाचारस्य, असतः, आसुरभावस्य, न्यायविरुद्धाचारस्य विजये विलोकितेऽपि अन्ते जगदम्बिकाया

अनुग्रहेण धर्मानुसारिणः, सत्यमार्गिणः सुदर्शनस्य विजयो भवति । एतेन महाकाव्ये सत्यासत्ययोः, न्यायान्याययोः, धर्माधर्मयोश्च द्वन्द्वस्य प्रस्तुत्या किञ्चित्कालमधर्मस्योत्थानं धर्माचारस्य पतनं भवेत् किन्तु सन्मार्गानुयायिनः पर्यन्ते कल्याणमेव भवति । देवा अपि तस्य साहाय्यं कुर्वन्ति । अतः सदाचारः, न्यायः, धर्माचारश्च जनैरबलम्वनीय इति कान्तासम्मितोपदेशः लभ्यते (चौलागाईं, २०७७ : ३१४) । महाकाव्यस्य मृदुलोपदेशप्राप्तिरूपप्रयोजनसिद्धौ च द्वन्द्वस्य स्थानं महनीयं विद्यते ।

महाकाव्ये नायकस्य सुदर्शनस्य शत्रुणा हृतराज्यप्राप्तिरूपफलवर्णने याः पञ्चकार्यावस्थाः दर्शिताः सन्ति तासां निर्बाहे द्वन्द्वस्य भूमिका महत्त्वपूर्णा दृश्यते । काव्ये नाटके वा वस्तुविन्यासे सन्धेः प्रकृतीनाञ्च प्रयोगः कर्तव्यः । कथायाः विकासे प्रधानस्य फलस्य प्राप्तौ प्रमुखचरित्रस्य औत्सुक्यस्य (आरम्भः), फलप्राप्तौ तस्य प्रयासानां (यत्नः), विरोधिनः (जनस्य, प्रकृतेः, देवानां, स्वकीयसामर्थ्यस्य, समाजस्य, प्रविधेः) अवरोधात् विजयाशायाः बलाबलयोः स्थितेः (प्राप्त्याशा), क्रमेणावरोधापसरणेन फलप्राप्तिसन्निकटावस्थाप्तेः (नियताप्तिः), पूर्णतः विघ्ननिवृत्तिर्भूत्वा फलप्राप्तेर वस्थायाश्च (फलागमः) शृङ्खलाबद्धतयोपस्थितिर्भवति । *जगदम्बिकावैभव*महाकाव्येऽपि नायकस्य सुदर्शनस्य शत्रुजितो राजपदपुनःप्राप्तौ सङ्घर्षकाले मातामहस्य वीरसेनस्य मरणम्, मात्रा भारद्वाजाश्रमे नीत्वा रक्षणम्, दुर्गायाः प्रसादात् शशिकलया सह प्रीतिर्विवाहः, सुवाहुराज्ञा सह सम्बन्धः, शत्रुवधादयः सर्वाः घटनाः द्वन्द्वस्य माध्यमेनैव प्रकटीकृताः सन्ति । ताः घटनाः काव्यस्य वस्तुविन्यासोक्तकार्यावस्थासङ्घट्टने च सहाय्यमाचरन्त्यः सन्ति । अतः कार्यावस्थायाः निर्वहणे द्वन्द्वस्य साहाय्यं स्पष्टं लक्ष्यते ।

रसाभिव्यक्तौ च सुदर्शनस्य फलप्राप्तेर्विघ्नापसारणयत्नः सहायः वर्तते । सुदर्शनाय राजपदालङ्करिष्णुः वीरसेनः युधाजिद्राज्ञा सह युद्धं करोति । तत्र वीररसः युधाजिद्वीरसेनयोर्द्वन्द्वस्य माध्यमेनाभिव्यक्तोऽस्ति । राजपदलाभाय दुर्गाराधाने जगदम्बिकाविषयकरतिभावः, सहायाप्तौ सुबाहुराज्ञा सह सम्बन्धविस्ताराय शशिकलाप्रेमपरिणयादौ शृङ्गारः, शत्रुजित्सुदर्शनयोः, सुबाहुयुधाजितोः, जगदम्बिकया सह युधाजिच्छत्रुजितोश्च युद्धे वीररसोऽभिव्यक्तोऽस्ति । अतः महाकाव्ये रसप्रबन्धने सुदर्शनस्य स्वराज्यपुनःप्राप्तिरूपफलाप्तेः प्रतिकूलस्थितेर्निराकरणयत्नः प्रधानकारणं विद्यते । अतो महाकाव्ये रसाभिव्यक्तौ च द्वन्द्वस्य महत्त्वपूर्णा भूमिका दृश्यते ।

## निष्कर्षः

रामकृष्णशिवादिदेवान् राजपुरुषान् वा नायकमङ्गीकृत्य महाकाव्यरचनाक्रमात् पृथक्तया भीमकान्तपन्थीनाम्ना कविना भगवतीं जगदम्बिकां नायिकां विधाय लिखितं *जगदम्बिकावैभव*महाकाव्यं संस्कृतमहाकाव्यपरम्परायां नूतनं विद्यते । पाण्डित्यालङ्कारिकचमत्कृतिप्रदर्शने यत्नरहितं सरलं सरसं सुबोध्यञ्च महाकाव्यमिदं द्वन्द्वविधानदृष्ट्या च महत्त्वपूर्णं स्थानमारोहति ।

महाकाव्ये मुख्यतया सुदर्शनयुधाजितोः द्वन्द्वं प्रस्तूय जगदम्बिकायाः कृपया सुदर्शनस्सय विजयं युधाजितः पराजयञ्च प्रदर्श्य सत्यस्य, दैवभावस्य, न्यायस्य च सदा विजयो भवतीति सन्देशः प्रस्तुतोऽस्ति । महाकाव्यस्य प्रथमसर्गादेव द्वन्द्वं विकसितं लभ्यते । मनोरमायाः, युधाजितः, शशिकलायाः, सुबाहोश्च मानसद्वन्द्वात् काव्यस्य पठनसमये भावकानां मनसि इतो किं भविष्यति ? इतो किं भविष्यति ? इति जिज्ञासा समुदेति । तया जिज्ञासया महाकाव्यस्य कथा सरोमाञ्चा सकौतुका च विद्यते । तथा सत्यपि महाकाव्ये वर्णनीयाङ्गविषयवर्णने, घटनायाः प्रस्तुतौ, पात्रगतमनोभावचित्रणे च यथोचितविस्तारस्याभावात् द्वन्द्वस्याभिव्यक्तौ च शैथिल्यं जातमस्ति । बाह्यान्तरिकद्वन्द्वयोः प्रभावपूर्णं चित्रणं यथा विधातुं शक्यते स्म तथाऽत्र न कृतम् । तेन महाकाव्यमिदं द्वन्द्वविधानाधारेण मध्यमप्रकारकं दृश्यते ।

ध्रुवसन्धेः मृत्योरनन्तरं पुत्रयोर्मध्ये ज्येष्ठस्य सुदर्शनस्य राजपदे स्थापनं परम्परानुमतं न्याय्यं चासीत् परन्तु युधाजित् बलेन स्वदौहित्रं शत्रुजितं नियोजयति । एतस्मादेव महाकाव्ये द्वन्द्वस्यारम्भो भवति । तदेव विकसितं चरमावस्थां प्राप्नोति । शत्रुणा युधाजिता बलादपहृतस्य राजपदस्य लाभरूपफलाप्तौ, सत्यस्य, धर्मस्य, दैवभावस्य, न्यायस्य च मार्गः जनैरवलम्वनीयः इति कान्तासम्मितोपदेशरूपफलसिद्धौ, आरम्भ-यत्नादिकार्यावस्थानिर्वहणे, जगदम्बिकाविषयकरतिभावस्य तथैव शृङ्गारशान्तवीरादिरसानामभिव्यक्तौ च नायकस्य सुदर्शनस्य विघ्नापसारणयत्नः सहायकः दृश्यते। तस्य कथायां रोमाञ्चकतायाः, कौतूहलस्य च समुत्पत्तौ, प्रधानफलस्य सिद्धौ, कार्यावस्थासङ्घट्टने, रसाभिव्यक्तौ च महत्त्वपूर्णं स्थानं दृश्यते । अतः महाकवेः भीमकान्तस्य जगदम्बिकावैभवं द्वन्द्वप्रयोगस्य दृष्ट्या उल्लेखनीयं महाकाव्यमस्ति ।

## कृतज्ञताज्ञापनम्

प्रस्तुतालेखं पठित्वा परिमार्जनाय सहाय्यं कृत्वा स्वरूपेऽस्मिन् नेतुं योगदानकर्तृभ्यः विज्ञेभ्यः, सम्पादकेभ्यः, परामर्शदातृभ्यश्च श्रद्धावनतोऽहं हार्दिकीं कृतज्ञतां व्यनज्मि ।

## सन्दर्भसूची

तिमिल्सिना, महानन्द (२०७३). *जगदम्बिकावैभवमहाकाव्यस्य साहित्यिकमनुशीलनम्.* [अप्रकाशितः विद्यावारिधिस्तरीयः शोधप्रबन्ध]. नेपाल-संस्कृत-विश्वविद्यालयः ।

तिमिल्सिना, महानन्द (२०७७, चैत्र क). जगदम्बिकावैभवे शास्त्रव्युत्पत्तिः. *हाम्रो पुरुषार्थ* २ (८९). पृ. ५३६-५५५. किरण पुस्तकालय ।

तिमिल्सिना, महानन्द (२०७७, चैत्र ख). जगदम्बिकावैभवे स्तुति-प्रीति-सूक्ति-प्रकृति-सौन्दर्यसमीक्षणम्. *हाम्रो पुरुषार्थ* २ (८९). पृ. ५५६-५७७. किरण पुस्तकालय ।

न्यौपाने, सुभासचन्द्र (२०६९). विश्वामित्र मेनका खण्डकाव्यमा द्वन्द्वविधान. *दृष्टिकोण* १२. पृ. ३१५-३६०. *https://doi.org/10.3126/dristikon.v10i1.34597.*

पन्थी, टीकाराम (२०५६). जगदम्बिकावैभवमहाकाव्यस्य समीक्षणम् [भूमिका]. *जगदम्बिकावैभवम्.* लक्ष्मीकान्त पन्थी ।

पन्थी, भीमकान्त (२०५६). *जगदम्बिकावैभवम्.* लक्ष्मीकान्त पन्थी ।

पन्थी, लक्ष्मीकान्त (२०७७, चैत्र). जगदम्बिकावैभवमहाकाव्यस्य कथावस्तुविवेचनम्. *हाम्रो पुरुषार्थ* २ (८९). पृ. ५२५-५३१. किरण पुस्तकालय ।

पोखेल, नुरापति (२०७७, चैत्र). नैपालका महाकाव्यकाराः. *हाम्रो पुरुषार्थ* २ (८९). पृ. ५७८-५८४. किरण पुस्तकालय ।

रेग्मी, जगन्नाथ (२०७३). काव्यतत्त्वदृष्ट्या जगदम्बिकावैभवस्य पर्यालोचनम्. *अवधारणा* वर्ष ४, अङ्क १. पृ. ९१-१००. सिर्जनशील लोकतान्त्रिक प्रतिष्ठान ।

रेग्मी, जगन्नाथ (२०७०). नेपाले संस्कृतमहाकाव्यप्रणयनपरम्परा. *प्राज्ञ-सुरभि* वर्ष १, अङ्क १. पृ. २९-३९. नेपाल प्राध्यापक संघ, विन्दुवासिनी संस्कृत विद्यापीठ एकाइ ।